# ६. कन्येयं कुलजीवितम् ।

**I एकवाक्येन संस्कृतभाषया उत्तरं लिखत ।**

1. पर्वतराजस्य पुत्री का ? (K)
2. मेना कस्य पत्नी? (K)
3. उदाहरणवस्तुषु अग्रण्यः कः?(K)
4. अधोमुखी पार्वती किं गणयामास? (K)
5. जगतः पिता कः? (K)
6. भूधरेश्वरः कः? (K)
7. विश्वस्य कर्मणां साक्षी कः?(K)
8. कन्यार्थेषु के गृहिणीनेत्राः? (K)
9. कन्यार्थिनः के? (K)
10. सप्तर्षिषु कः भूधरं प्रत्युवाच? (K)

**II द्वित्रैः वाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. मुनयः किमर्थं हिमवतः समीपम् आगताः ? (K)
2. हिमवान् ऋषीणाम् आगमने किम् उक्तवान्? (K)
3. पुत्र्याः विवाहविषये पर्वतराजस्य निर्णयः कः? (K)
4. प्राञ्जलिः भूधरेश्वरः सप्तर्षीन् किमुवाच ? (K)
5. हिमवान् स्वपुत्रीं किमवोचत्? (K)

**III दशवाक्यैः संस्कृतभाषया कन्नडभाषया आङ्ग्लभाषया वा उत्तरं लिखत ।**

1. कन्येयं कुलजीवितम् इति पद्यभागस्य सारांशं लिखत । (A)
2. अङ्गिराः हिमवन्तं किम् अवोचत् ? (A)

**IV पाठनाम उल्लिख्य अधोनिर्दिष्टश्लोकानाम् अनुवादं कन्नड-आङ्ग्लभाषया वा कुरुत ।**

1. तत्र वेत्रासनासीनान् कृतासनपरिग्रहः ।
   इत्युवाचेश्वरान्वाचं प्राञ्जलिर्भूधरेश्वरः ।। (C)
2. एते वयममी दाराः कन्येयं कुलजीवितम् ।
   ब्रूत येनात्र वः कार्यमनास्था बाह्यवस्तुषु ।। (C)
3. यावन्त्येतानि भूतानि स्थावराणि चराणि च ।
   मातरं कल्पयन्त्वेनामीशो हि जगतः पिता ।। (C)
4. एवं वादिनि देवर्षौ पार्श्वे पितुरधोमुखी ।
   लीलाकमलपत्राणि गणयामास पार्वती ।। (C)

5. इदमत्रोत्तरं न्याय्यमिति बुद्ध्या विमृश्य सः ।
आददे वचसामन्ते मङ्गलालङ्कृतां सुताम् ।। (C)

**V मञ्जूषातः सूक्तं पदं चित्वा रिक्तस्थानं पूरयत ।**

1. इत्युवाचेश्वरान्वाचं प्राञ्जलिः............। (S)
2. .......... गङ्गाप्रपातेन धौतपादाम्भसा च वः । (S)
3. तमर्थमिव .......... सुतया योक्तुमर्हसि । (S)
4. अशोच्या हि पितुः कन्या............प्रतिपादिता । (S)
5. मातरं कल्पयन्त्वेनां ईशोहि जगतः .......... । (S)
6. सुता सम्बन्धविधिना भव ........... गुरुः । (S)
7. लीला...........गणयामास पार्वती । (S)
8. शैलः सम्पूर्णकामोऽपि ..........उदैक्षत । (S)
9. प्रायेण...........कन्यार्थेषु कुटुम्बिनः । (S)
10. अर्थिनो मुनयः प्राप्तं..........फलं मया । (S)

( भारत्या, गृहमेधि, गृहिणीनेत्राः, मूर्ध्नि, पिता, कमलपत्राणि, मेनामुखम्, सद्भर्तुः, भूधरेश्वरः, विश्वगुरोः )

**VI संयोजयत ।** (S)

| **अ** | **आ** |
|---|---|
| शम्भुः | महर्षिः |
| कविकुलगुरुः | पर्वतराजः |
| कुमारसम्भवम् | कालिदासः |
| अङ्गिराः | महाकाव्यम् |
| मेना | उमा |

**VII रेखाङ्कितानि पदानि आश्रित्य प्रश्ननिर्माणं कुरुत ।**

1. शैलः मेनामुखम् उदैक्षत । (S)
2. शम्भुः ते दुहितरं वृणुते । (S)
3. त्वं विश्वात्मने भिक्षा परिकल्पिता असि । (S)
4. मङ्गलालंकृतां सुतां आददे । (S)
5. आत्मानं पूतम् अवैमि । (S)
6. ऋषयः अङ्गिरसं नोदयामासुः ।(S)

*****************